International Journal of Jyotish Research: 2016; 1(1): 28-32

International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2016; 1(1): 28-32
© 2016 Jyotish
www.jyotishajournal.com
Received: 26-05-2016
Accepted: 28-06-2016

**डॉ. शिवाकान्तमिश्रः**
सहायकाचार्यः ज्योतिषविभागः
जगद्गुरुरामानन्दाचार्य, राजस्थान संस्कृत विश्वविद्यालयः, जयपुरम्

**Correspondence**
**डॉ. शिवाकान्तमिश्रः**
सहायकाचार्यः ज्योतिषविभागः
जगद्गुरुरामानन्दाचार्य, राजस्थान संस्कृत विश्वविद्यालयः, जयपुरम्

# शकुनतत्त्वमीमांसा

**डॉ. शिवाकान्तमिश्रः**

## प्रस्तावना

भारतीयसांस्कृतिकपरम्परायाः सर्वाधिकमहत्त्वपूर्णमूलाधारः वैदिकसाहित्यं धर्मशास्त्रं ज्योतिषशास्त्रं च विद्यते। ब्रह्मणा रचितसृष्टौ सर्वेषां पदार्थानां जीवानामर्थात् कीटपतंगादितः समारभ्य जीवजन्तुमानवादीनां स्वतन्त्रमस्तित्वं वर्त्तते। सृष्टौ स्थितसजीवानां निर्जीवानां वस्तूनां च स्वकीयस्वरूपं पृथक्–पृथक् चेष्टा च वर्त्तते। ज्योतिषशास्त्रं कीटपतंगादितः समारभ्य जीवजन्तुमानवादीनां स्वरादिविविधचेष्टाभिः शुभाशुभफलं व्यनक्ति। शकुनशास्त्रस्य क्षेत्रं बहुविस्तृतं वर्त्तते। व्यासरचितपुराणेषु शकुनशास्त्रस्य चर्चा विस्तृतरूपेण कृतं वर्त्तते। शकुनं ज्योतिषशास्त्रस्य संहितास्कन्धान्तर्गतं वर्त्तते। प्राचीनकाले पृथिव्याः वातावरणं शुद्धमासीत्। वातावरणस्य शुद्धत्वात् कीटपतंगादितः समारभ्य समेषां प्राणीनां व्यवहारः वास्तविकमासीत् परं सम्प्रति सर्वत्र पृथिव्याः वातावरणं विषाक्तं वर्त्तते। वातावरणतः समारभ्य सर्वेषां भूनिवासीनां प्राणीनां व्यवहारेषु परिवर्त्तनं जातम्। पर्यावरणजन्यप्रदूषणवशात् दिनानुदिनं प्राणीनां लोपः संजायते। अनेन कारणेन शाकुनविदानां समक्षे यथा प्रकृतेः परिस्थितिः प्राचीनकाले आसीत् तथा सम्प्रति न विद्यते। शाकुनविदानां समक्षे अन्या गम्भीरसमस्या वर्त्तते जनानां विश्वासस्य। सम्प्रति यदा मानवः समस्यायां मग्नो भवति तदा आध्यात्मविज्ञानाश्रितज्योतिर्विज्ञानस्याश्रयं प्राप्तुं प्रयत्नं करोति किन्तु ततः पूर्वं शास्त्रोक्तं सर्वं विज्ञानाश्रितं तथ्यमसत्यमिति मत्वा उपेक्षां करोति। शाकुनशास्त्रस्य ज्ञानमतीव कठिनं सूक्ष्मं च वर्त्तते यतोहि संहिताग्रन्थेषु शकुनशास्त्रस्य बहवो भेदोपभेदाः, लक्षणानि, स्वरूपाणि च प्राप्यन्ते। वराहेण स्वकीयबृहत्संहिताग्रन्थे उक्तं यत् मानवैः जन्मजन्मान्तरकृतं शुभाशुभकर्मणः परिणामवशात् प्राप्तजन्मनि गमनसमये कार्यसमये वा पशुपक्ष्यादिभिः कर्मणः पाकं प्रकाश्यते तदेव शाकुनमिति। यथोक्तम्–

अन्यजन्मान्तरकृतं कर्म पुंसां शुभाशुभम्।
यत्तस्य शकुनः पाकं निवेदयति गच्छताम्।।
बृहत्संहिता, अ. 86, श्लो.5,

वराहेण मुख्यतया शकुनस्याधाररूपजीवजन्तूनां त्रिधा विभाजनं पुरूष–स्त्री–नपुंसकरूपेण कृतम्। वराहेण ग्रामचर–वनचर– जलचर–पृथ्वीचर–आकाशचारी–दिवाचारी–निशाचारी–उभयचारीणां जीवजन्तूनां पदार्थानां च पुरूषस्त्रीनपुंसकरूपेण वर्गीकरणं गति–दृष्टि–शब्दाश्रयेण कृतम्। पुरूषस्त्रीनपुंसकजीवानां लक्षणं प्रदत्तं यथा–

पिनोन्नतविकृष्टांसाः पृथुग्रीवाः सुवक्षसः।
स्वल्पगम्भीरविरुताः पुमांसः स्थिरविक्रमाः।।
बृहत्संहिता, अ. 86, श्लो.8,

तनूरस्कशिरोग्रीवाः सूक्ष्मास्यपदविक्रमाः।
प्रसक्तमृदुभाषिण्यः स्त्रियोऽतोऽन्यन्नपुंसकम्।।
बृहत्संहिता, अ. 86, श्लो.9,

स्थूला उन्नतविस्तीर्णस्कन्धयुक्ता विशालग्रीवायुक्ताः सुन्दरवक्षस्थलयुक्ता गम्भीरस्वरयुक्ताः, स्थिरविक्रमयुक्ताश्च जीवाः पुरुषसंज्ञकाः भवन्ति। अल्पकाययुक्ता लघुशीरयुक्ता लघुग्रीवायुक्ता सूक्ष्मास्यपदशक्तियुक्ता मधुरभाषिण्यः जीवाः स्त्रीसंज्ञकाः भवन्ति तथा च यत्र पुरुषस्त्रीयोः गुणाः लक्षिताः भवन्ति ते जीवाः नपुंसकाख्याः।

बृहत्संहिताग्रन्थानुसारं मार्गे गमनशीलमानवोपरि, सैन्येषु नृपोपरि, पुरे पुरप्रधानोपरि, जनसमुदायेषु समुदायप्रधानोपरि, ग्रामे विद्यया वयसा वरिष्ठोपरि, परिवारेषु वयोऽधिकजनोपरि च शकुनानां प्रभावो पतति [1]।
नरपतिजयचर्यायामुक्तं यत् –

स्वरचक्राणि चक्राणि भूबलानि बलानि च।
ज्यौतिषं शकुनं चैव षडंगानि वदाम्यहम्।।
नरपतिजयचर्या, स्वर.प्र., श्लो. 19,

भविष्यकथने यानि शास्त्राणि प्रयुक्तानि भवन्ति तेषु शकुनशास्त्रं स्वतन्त्रं शास्त्रं वर्त्तते। यः शकुनशास्त्रं जानाति सः जीवने कदापि दुर्दिनं न पश्यति अपितु सर्वत्र विजयं सफलतां च प्राप्नोति। शकुनशास्त्रज्ञः यत्र कुत्रापि गच्छति सर्वत्र प्रतिष्ठां प्राप्नोति। यतोहि सः शकुनज्ञानबलेन विज्ञातदैवो भवति। वस्तुतः शकुनशास्त्रज्ञाः पंडितजनाः शुभशकुनान् ज्ञात्वा सम्मानदाता नृपस्याभ्युदयाय शकुनजनितशुभाशुभफलानि नृपस्याग्रे निरूप्यन्ति। शकुनशास्त्रज्ञाः तान् शकुनान् पूजयन्ति येन नृपस्य शोभनं दशाफलं, बाधारहितकार्यसिद्धिः, मूलस्थनाभिरक्षा, सार्थकान् दुःसाध्यान् कार्याणां संसिद्धिम्, आरोग्यता च भवेयुः। अनेन कारणेन स्वरशाकुनमन्त्रज्योतिषप्रश्नानां ज्ञाता पुरूषो राजसभायां पूजितो भवति। नरपतिजयचर्यायामुक्तं यथा–

स्वरज्ञः शकुनज्ञश्च दैवज्ञो मन्त्रपारगः।
केरलीवित्तथा राज्ञां कीर्त्तितं रत्नपंचकम्।।
नरपतिज.स्वरबलप्रशंसा, श्लो. 19,

शकुनशास्त्रं गणितविहीनं, ग्रहगतिचर्चाविहीनं च शास्त्रं विद्यते। अस्य शास्त्रस्य ज्ञानं केवलमस्य शास्त्रस्याध्ययनेन प्रकृतेः परीक्षणेन च जायते। अनेन कारणेन फलमपि शीघ्रमेव ज्ञायते। अस्य शास्त्रस्याधारः अष्टादशपुराणानि, संहितास्कन्धश्च वर्त्तते। शकुनशास्त्रस्य मुख्यप्रवर्तकाः व्यासवसिष्ठनारदगर्गवराहवल्लालसेनादयः सन्ति। यद्यपि शकुनविषये चर्चा वाल्मीकीरामायणमहाभारतपुराणेषु तथा साहित्यशास्त्रस्य काव्यग्रन्थेषु विविधस्थलेषु प्रचुरमात्रायां दरीदृश्यते। एवमेव ज्योतिषशास्त्रस्य मुहूर्तादिसंहिताग्रन्थेष्वपि शकुनविषये विशिष्टचर्चा स्थले–स्थले दृष्टिपथे समागच्छति। मुहूर्तचिन्तामणिग्रन्थे प्रश्नलग्नात् पुत्रपुत्रादिज्ञानावसरे शकुनस्य चर्चा कृता यथा –

प्रश्नलग्नक्षणे यादृशापत्ययुक् स्वेच्छया कामिनी तत्र चेदाव्रजेत्।
कन्यका वा सुतो वा तदा पण्डितैस्तादृशापत्यमस्या विनिर्दिश्यते।।
शंखभेरीविपंचीरवैर्मङ्गलं जायते वैपरीत्यं तदा लक्षयेत्।
वायसो वा खरः श्वा श्रृगालोऽपि वा प्रश्नलक्षणे रौतिनादं यदि।।
मु.चि.वि.श्लो. 8,9,

अर्थात् प्रश्नलग्नसमये यादृशः सन्तानयुक्ता काचिदन्या स्त्री स्वेच्छया आगच्छेत् तदा पण्डितैः प्रश्नकर्तुः कन्यकायाः तादृशमपत्यं वक्तव्यमिति। एवमेव उक्तं यत् प्रश्नलग्नसमये शंख–मृदंग– वीणादि शब्दैः मंगलं भवति। यदि वायस–गर्दभ–कुक्कुर–श्रृगालादीनां रूदनशब्दं भवति तर्हि प्रश्नकर्तुः अमंगलं भवति।
वराहेण स्वकीय बृहत्संहितायोगयात्राग्रन्थयोर्मध्ये स्वतंत्ररूपेण शकुनविषयेऽध्यायौ प्रदत्तौ परं योगयात्राग्रन्थोक्तशकुनाध्यायस्य वैशिष्ट्यं युद्धे विजयनिमित्तयात्राकालीकशकुनादयः सन्ति। योगयात्राग्रन्थे शकुनस्य बहुधा विभाजनमाचार्येण कृतम्।

**यात्राकालीनशुभाशुभशकुनानि**

- छुछुन्दरी, शूकरिका, श्रृगालिनी, कपोती, कलहकारिका, पिंगलिका, कोकिला, गृहगोधिका तथा पुरूषसंज्ञकाः पक्षिणः एते सर्वे यानसमये वामभागगाः वा वामभागे स्थिताः शुभाः भवन्ति[2]।
- श्येनः, मृगः, नीलकण्ठः, वानरः, श्रीकर्णः, छिक्कारकः, पिप्पिकाः, छागः, मयूरः, गजः तथा च स्त्रीसंज्ञकाः पक्षिणश्च एते सर्वे यात्रासमये दक्षिणभागसंस्थाः शुभदायकाः भवन्ति[3]।
- वाह्वोः परस्परहस्तेन ताडनं, मुखात् निस्सरितस्तुतिपरकशब्दः, शंखध्वनिः, तूरीयशब्दः, स्वस्तिकवाचनं, वेदध्वनिः, मांगलिकगानं च एते सर्वे शुभशब्दाः यानसमये वामभागतः आगच्छेत् तर्हि प्रयातुः शुभदायकाः भवन्ति तथा च यात्रा समये अन्यपुरूषाणां रोदनशब्दाः दक्षिणतः आगच्छेत् तर्हि यातुः कल्याणकारकाः भवन्ति[4]।
- चातकपक्षी–छाग–मयूर–नीलकण्ठ–नकुलानां च नामोच्चारणं, प्रत्यक्षदर्शनं शब्दाश्च यात्राकाले शुभप्रदाः भवन्ति। यात्रासमये कृकलासस्य दर्शनं शुभफलदायको न भवति। गोधा–शूकर–जाहक–सर्प–शशकानां च नामोच्चारणं शुभफलप्रदाः भवन्ति परमेतेषां क्रन्दनं वा दर्शनं यात्राकाले इष्टप्रदाः न भवन्ति। रीक्षवानरयोः नामोच्चारणं शब्दं न अशुभफलदायकौ तथा प्रत्यक्षदर्शनं यात्राकाले शुभफलप्रदौ भवतः[5]।
- नकुल–मृग–पक्षीणां यात्राकाले वामभागात् दक्षिणभागे गमनं तथा च कुक्कुरश्रृगालयोः विपरीतेन अर्थात् दक्षिणभागात् वामभागे गमनं शुभफलदायकं भवति[6]।
- अपराह्नकाले नीलकण्ठनकुलयोः वामभागे गमनं शुभप्रदं भवति। वनेषु कुक्कुराः मृगवत् भ्रमणकुर्वन् दृश्यन्ते तथा सूर्यास्तसमये मयूरसारसशतपत्रशुकादिखगाः प्रदक्षिणक्रमेण गच्छेयुः तर्हि शुभफलदायकाः भवन्ति[7]।
- नष्टपदार्थानामन्वेषणे, मित्रादीनां समागमे, युद्धभूमौ युद्धार्थं प्रवेशकाले, गृहप्रवेशसमये, नृपस्य दर्शने च यात्रानिमित्तोक्तनियमात् विलोमलक्षणं शुभप्रदं भवति अर्थात् यात्रायां यानि शकुनानि वामभागे शुभानि तानि शकुनानि उपरोक्तकार्येषु दक्षिणभागे शुभानि भवन्ति। यानि यात्रायां दक्षिणभागे शुभानि तानि शकुनानि उपरोक्तकार्येषु वामभागे शुभानि भवन्ति। एवमेव यानि शकुनानि यात्रायामग्रतः शुभानि तानि उपरोक्तकार्येषु पृष्ठतः शुभानि तथा च यानि यात्रायां पृष्ठतः शुभानि तानि शकुनानि उपरोक्तकार्येषु अग्रतः शुभानि भवन्ति। केचिदाचार्याणां मतानुसारेण यात्रानिमित्तोक्तशुभशकुनानि नृपदर्शनेऽपि ग्राह्यानि[8]।

---

[1] पथ्यात्मानं नृपं सैन्ये पुरे चोद्दिश्य देवताम्।
सार्थे प्रधानं साम्ये स्याज्जातिविद्यावयोऽधिकम्।। बृहत्संहिता, शाकुनाध्यायः, अ. 86, श्लो.8,

[2] छुछुन्दरी शुकरिका शिवा च श्यामा रला पिंगलिकाऽन्यपुष्टा। वामा. ............पतत्त्रिणः स्युः।। यो.या. शकुनाध्यायः, श्लो. 1,

[3] श्येनो रूरूः पूर्णकुटः..................च याने हिता दक्षिणभागसंस्थाः।। यो.या. शकुनाध्यायः, श्लो. 2,

[4] आस्फोटिताक्ष्वेडितशंखतूर्य.................दक्षिणतः परेषाम्।। यो.या. शकुनाध्यायः, श्लो. 3,

[5] भारद्वाज्यजवर्हिजाषनकुलाः.................धन्यं कीर्त्तनमृक्षवानरफलं तद् व्यत्ययाच्छोभनम्।। यो.या. शकुनाध्यायः, श्लो. 4,

[6] नकुलस्य मृगस्य पक्षिणां वामाद्दक्षिणभागसेवनम्.........व्यत्यासेन फलं प्रशस्यते।। यो.या. शकुनाध्यायः, श्लो. 5,

[7] चाषो नकुलश्च वामगौ दिवसार्धात्परतः शुभप्रदौ.......शतपत्रोऽस्तमये च दक्षिणः।। यो.या. शकुनाध्यायः, श्लो. 6,

[8] नष्टावलोकनसमागमयुद्धकर्मवेश्मप्रवेश...................भवन्ति केचिज्जगुर्गमनवन्नृपदर्शनेषु।। यो.या. शकुनाध्यायः, श्लो. 7,

- यदि यात्रासमये गमनदिशायामग्रे विद्युतेन अनाहतः अर्थात् सुन्दरवृक्षाः, सस्यैः पूर्णाः पवित्रप्रकाशमानसुन्दरभूमयः, शुभतिथिः, शुभदिनं, शुभनक्षत्रं, शुभलग्नं, शुभसमयः स्युः तर्हि अशुभफलदायकाः अशुभशकुनान्यपि शुभफलदायकाः भवन्ति[9]।
- यदि यात्राकाले शुभशकुनानि खण्डितवृक्षेषु, शुष्कवृक्षेषु, कण्टकेषु, श्मशानभूमौ, भस्मेषु, अस्थिसमूहेषु, तुषायां, नदीकुलेषु, भवनेषु, रिक्तगृहेषु, अशुभस्थानेषु च दृश्यन्ते तर्हि शुभशकुनान्यपि अशुभशकुनानि कथितानि अर्थादशुभप्रदानि भवन्ति [10]।
- सूर्येण त्यक्ता दिशा अंगारिणी कथ्यते। यस्यां दिशायां सूर्यः तिष्ठति सा दिशा प्रदीप्ता उच्यते। यस्यां दिशायां सूर्यः गमिष्यति सा दिशा प्रधूमिता भवति तथा च शेषाः पंचदिशाः शान्ताः कथिताः। शान्ताः दिशाः सर्वदा शुभफलदायकाः भवन्ति अर्थात् शान्तदिशायां गमनेन कार्यसिद्धो भवति [11]।
- मुक्ताख्यसंज्ञकदिशायामपशकुनस्याशुभं फलमतीते जातमिति ज्ञेयम्। प्रदीप्ताख्यसंज्ञकदिशायामपशकुनस्यानिष्टं फलं वर्त्तमानं ज्ञेयम्। प्रधूमिताख्यदिशायामपशकुनस्यानिष्टं फलं भविष्ये भविष्यति। अंगारिण्यादिभ्यः पंचमासु शान्तासु दिक्षु समस्तगतवर्त्तमानभाविफलं सर्वकाले समानं ज्ञेयम्। शेषयोर्दिशोः फलं निकटवर्तिशान्तदीप्तदिशानुरोधेन ज्ञेयम् [12]।
- मांसाद्यपवित्रपदार्थानां भक्षकानां शकुनं प्रदीप्तम्, तृणफलभक्षकानां शकुनं स्वभावतः शुभफलदायकं तथा अन्नभक्षकानां शकुनं मिश्रसंज्ञको भवति। एते शकुनाः दिक्स्थानसमयानुसारेण फलदाः भवन्ति अर्थात् अंगारिणी–प्रदिप्ता–धूमिता– शान्तादिदिशानां फलानि दिक्देशकालानुरोधेन विचारणीयाः। विशेषरूपेण दिक्देशयोः चिन्तनं सूर्यस्योदयकालतः कर्त्तव्यम् [13]।
- युद्धेन पीडितः, रोगेन पीडितः, भयाक्रान्तः, विक्षिप्तः, शत्रुभिर्पीडितः, युद्धमांसयोरभिलाषिणः, देशस्य सीमान्तभागे, नद्यः अपरतटे च एभिरुत्पन्नशुभाशुभशकुनानां विचारः शुभाशुभफलनिर्धारणे न करणीयः[14]।
- यात्रासमये जलार्थमभ्युद्यतः शून्यकलशः यातुः सिद्धिदायको भवति। छात्राणां, चौरकर्मनिमित्तगमनार्थं समुत्सुकानां चौराणां, व्यवसायकर्मनिमित्तगमनार्थं समुत्सुकानां वैश्यानां चेदं शकुनमतिशयेन कार्यसाधनकरो भवति [15]।
- श्यामा, श्येनः, कुक्कुरः, वंजुलः, मयूरः, श्रीकर्णः, चक्रवाकः, नीलकण्ठः, अंडीरकः, खंजरीटकः, शुकः, काकः, त्रिविधाः कपोताः, चातकः, कुलालः, कुक्कुटः, गर्दभः, हारीतः, गृध्रः, मर्कटः, स्फेटः, वनकुक्कुरः, पूर्णकूटः, चटकाश्च एते पक्षिणः जन्तवश्च दिवायां स्वकार्याणि सम्पादयन्ति तथा रात्रौ विश्रामः कुर्वन्ति अर्थात् दिवासंचराः सन्ति [16]।
- लोमासिका (जन्तुविशेषः), पिंगलः (पक्षिविशेषः), छप्पिका (पक्षिविशेषः), वकः, उलूकः, शशकश्च एते पक्षिणः जन्तवश्च रात्रौ संचरन्ति यदि सर्वे पक्षिणः जन्तवश्च स्वकालोत्क्रमचारिणः भवन्ति अर्थात् दिवाचारिणः रात्रिचारिणो भवेयुः तथा रात्रिचारिणो दिवाचारिणो भवेयुः तदा देशस्य नाशाय भवति वा नृपान् नाशयन्ति[17]।
- अश्वः, मानवः, अहिः, उष्ट्रः, शार्दूलः, सिंहः, रीक्षः, गोधा, ईहामृगः, नकुलः, हरिणः, कुक्कुरः, छागः, गौ, व्याघ्रः, हंसः, पृषतमृगः, श्रृगालः, शल्लकी, कोकिलः, विडालः, सारसः, वराहश्च एते पक्षिणः जन्तवश्च दिवायां रात्रौ च संचरन्ति अर्थात् उभयचराः भवन्ति[18]।
- दिवाचारिणः, रात्रिचारिणः, उभयचारिणश्च स्वसमये नगरवनमिश्रचराः जीवाः स्वभूमिसंस्थाः भवेयुः तदा गमनेच्छुः पुरवासीनां राज्ञां च यात्रा सर्वविधोन्नतिदायकाः सुफलाश्च भवन्ति। यदि विपर्ययस्थाः उभयचारिणः अन्यसमयेऽन्य भूमिसंस्था भवेयुः अर्थात् दिवाचारिणः रात्रौ संचरन्ति तथा रात्रिचारिणः दिने संचरन्ति एवं नगरचराः जीवाः वने तथा वनचरा जीवा ग्रामे विचरन्ति तदा यियासोः अनिष्टफलदा भवन्ति एवं च पुरवासीनां राज्ञां च अनिष्टफलदा भवन्ति[19]।
- धुरेण पतितं यानं, अतिवयस्का कुमारी कन्या, अति महता गर्भयुक्ता स्त्री च पुरतः स्थिताः भवेयुः अथवा आगच्छ, तिष्ठ, उपविशतु, किमर्थं गच्छसि इति शब्दाः यात्रां निषेधयन्ति [20]।
- गान्धार–षड्ज–ऋषभाः मध्यमश्च एते स्वराः याने निश्चयेन शुभदायकाः भवन्ति। एतदतिरिच्य सप्तस्वरेषु निषादधैवतपंचमाः स्वराः याने शुभकराः न भवन्ति। मध्यमषड्जसंज्ञौ ग्रामौ च शुभौ भवतः तथा च गान्धारगीतमतिमंगलमिति देवाः कथयन्ति [21]।
- सर्वत्र सकलकर्मणि क्षुतं पापफलप्रदायकमित्याचार्याः कथयन्ति। गोः क्षुतं गमनेच्छुः मृत्युकरं भवति। यात्राकाले विडालशब्दः श्रूयते अथवा यातुः वस्त्रस्य पतनं वा कण्टकादिना नाशः शुभानि न भवन्ति[22]।
- हस्ते जालं धृतः जनः तथा हस्ते कुक्कुरं धृतः जनः प्राच्यां शुभकरौ न भवतः। हस्ते घातकशस्त्रं धृतः जनः दक्षिणभागगतः न शुभः। नपुंसकः पुनश्च हस्ते मद्यं धृतः जनः प्रतीच्यां दिशि न शुभौ भवतः। आसनहलनीचैः सहिता उत्तरदिक् शुभा न भवति [23]।
- पूर्वस्यां दिशि शुक्लानि पदार्थानि अश्वश्च, दक्षिणस्यां दिशि मांसं शवं च, पश्चिमस्यां दिशि कुमारी कन्या दधिश्च तथा उत्तरस्यां दिशि गौब्राह्मणसाधुजनाश्च अतिशुभकराः भवन्ति [24]।
- यः पूर्णकूटः सः करायिकाख्यः पक्षि भवति। कूर्मचक्रविभागेन करायिकाख्यः पूर्वदेशे वामभागगः तथा काकः दक्षिणभागगः शुभौ भवतः। कूर्मचक्रवशेन पूर्वोत्तरदेशेषु करायिकाकाकयोः विपर्ययेण

---

[9] निरुपहतमनोज्ञवृक्षसंस्थाः शुचिरुचिरावनि..............शुभफलोऽपि शुभप्रदः प्रदिष्टः।। यो.या. शकुनाध्यायः, श्लो. 8

[10] प्रभग्नशुष्कद्रुमकण्टकेषु श्मशान................सौम्योऽपि पापः शकुनः प्रदिष्टः।। यो.या. शकुनाध्यायः, श्लो. 9,

[11] अंगारिणी दिग्रविणा प्रमुक्ता........शेषाश्च शान्ताः शुभदाश्च ताः स्युः।। यो.या. शकुनाध्यायः, श्लो. 10

[12] यातं मुक्तायां साम्प्रतं दीपितायामेष्यं..................प्रत्यासन्नं शेषयोः शान्तदीप्तम्।। यो.या. शकुनाध्यायः, श्लो. 11,

[13] पिशिताशुचिभोजनः प्रदीप्तस्तृणफलभुक्................ दिक्स्थानोदयकालतश्च चिन्त्याः।। यो.या. शकुनाध्यायः, श्लो. 12,

[14] द्वन्द्वार्तरोगार्दितभीतमत्तवैरार्त्तयुद्धाभिष.................न चिन्तनीयाः सदसत्फलेषु।। यो.या. शकुनाध्यायः, श्लो. 13,

[15] रिक्तोऽनुकूलः कलशो जलार्थमभ्युद्यतः.............. क्रियाभ्युद्यमिनामतीव।। यो.या. शकुनाध्यायः, श्लो. 14,

[16] श्यामाश्येनशशघ्नवंजुलशिखिश्रीकर्ण...............चटकारश्चोक्ता दिवासंचराः।। यो.या. शकुनाध्यायः, श्लो. 15,

[17] लेमासिका पिंगलछप्पिकाख्यौ ....................स्युर्देशस्य नाशाय नृपान्तदा वा।। यो.या. शकुनाध्यायः, श्लो. 16,

[18] हयनरभुजगोष्ट्रद्वीपिसिंहर्क्षगोधा..................द्युनिशमपि विडालः सारसः शूकरश्च।। यो.या. शकुनाध्यायः, श्लो. 17,

[19] द्युनिशोभयचारिणः स्वकाले पुरवनमिश्रचराः............गमनेप्सोः पुरपार्थिवाशुभास्ते।। यो.या. शकुनाध्यायः, श्लो. 18,

[20] यानं धुरेण पतितं वृहती च कन्या............शब्दा स्थिरश्च गमनं प्रतिषेधयन्ति।। यो.या. शकुनाध्यायः, श्लो. 19,

[21] गान्धारषड्जऋषभाः खलु..........गान्धारगीतमपि भद्रमुशन्ति देवाः।। यो.या. शकुनाध्यायः, श्लो. 20,

[22] सर्वत्र पापं क्षुतमुद्दिशन्ति गोस्तु ..........भंगश्च न शोभनानि।। यो. या. शकुनाध्यायः, श्लो. 21,

[23] जालकरश्वकरौ न शुभौ प्राग्घातकशस्त्रकरौ......... पश्चादासनसीरखलैः सह चोदक्।। यो.या. शकुनाध्यायः, श्लो. 22,

[24] द्रव्याणि शुक्लानि तुरंगमश्च पूर्वेण..........सौम्येन गोब्राह्मणसाधवश्च।। यो.या. शकुनाध्यायः, श्लो. 23,

अर्थात् करायिकाख्यः पक्षिः दक्षिणगः तथा काकः वामभागगः प्रशस्तो भवति [25]।

- वामभागे दिव्यकः शुभः सिद्धिदायकश्च भवति। यदि दिव्यकः हस्तमात्रमुतुंगो भवति चेत् सर्वविधजयकारको भवति। तदेव दिव्यको वामभागे यातुर्जनस्योच्छ्रितितः हस्तप्रमितमुन्नत भवति चेत् अश्वगजसहिता सम्पूर्णपृथिव्या लाभं करोति[26]।
- मनुष्यः, अश्वः, गजः, छत्रम्, कलशः, ध्वजः, शय्या, भक्ष्यपदार्थः, पुष्पं, चामरं च एतानि यदि कुक्कुरः मूत्रेण सिक्त्वा गन्तुः अग्रतो गच्छति तर्हि अनन्तरं नृपः शत्रुशैन्यं नाशयति[27]।
- विषवृक्षः, कण्टकवृक्षः, शुष्कवृक्षः, मृद्पिण्डः, अस्थिसमूहश्च एतान् मुन्र्येण सिक्त्वा यदि कुक्कुरः गच्छति तदा अनिष्टप्रदो भवति। यात्रा दिशायां यदि कुक्कुरः सम्मुखे भषन् शरीरकम्पयन्, गां युध्यन् वा परस्परं युध्यन्, नखैः पृथिव्यां विलिखन्, वमन् कुर्वन् दृश्यते तर्हि यातुः शुभो न भवति [28]।
- कुक्कुरः उत्तानपादः शयनं करोति तदा अनिष्टफलदायको भवति। यदि सूर्यं दृष्ट्वा आर्त्तस्वरेण क्रन्दनं करोति तदा स्वामिनः अशुभं करोति। एकाधिकसंख्यायां कुक्कुराः ग्रामस्य मध्ये सूर्योदयकाले सूर्याभिमुखं भूत्वा आर्त्तस्वरेण क्रन्दनं करोति तर्हि ग्रामस्वामिनः मृत्युर्जायते तत्र नूतनग्रामप्रमुखो भवति। कुक्कुरः अग्निकोणे सूर्याभिमुखं भूत्वा आर्त्तस्वरेण क्रन्दनं करोति तर्हि शीघ्रमेव अग्नेः चौरस्य भयं भवति। सूर्यास्तसमये सूर्यं दृष्ट्वा आर्त्तस्वरेण क्रन्दनं करोति तदा कृषकानां कृते भयं भवति। प्रदोषकाले सूर्यं दृष्ट्वा आर्त्तस्वरेण क्रन्दनं करोति तर्हि कृषकानां कृते वायुजन्यभयं भवति। अर्धरात्रौ कुक्कुरः उत्तराभिमुखं भूत्वा आर्त्तस्वरेण क्रन्दनं करोति तर्हि ब्राह्मणानां कृतेऽशुभं भवति। रान्र्यन्ते कुक्कुरः ईशानकोणे मुखं कृत्वा क्रन्दति तर्हि कन्यायाः दूषणमग्निभयगर्भनाशश्च भवति। मुखे शुष्कास्थिं नित्वा गृहे प्रविशति तर्हि गृहस्वामिनः मृत्युर्जायते। यदि कुक्कुरः मुखे लौहजंजीरं वा रज्जुं वा नूतनछिन्नलतां नित्वा गृहे प्रविशति तर्हि बन्धनं भवति। कुक्कुरः मुखे शुष्कास्थिं नित्वा सम्मुखे आगच्छति चेत् कष्टकारकं तथा मुखे आर्द्रमांसादिभिः पूर्णमुखः आगच्छति तर्हि शुभदो भवति [29]। यदि कुक्कुरः पुरुषस्य मस्तक–कर–पादादि नित्वा आगच्छति तर्हि पृथिव्याः लाभो भवति।
- प्रसन्नमुखः एवं भक्ष्यपदार्थेन पूरितमुखयुक्तः नीलकण्ठः यस्य यातुः प्रदक्षिणं वा आकाशे स्वस्तिकवत् प्रदक्षिणं करोति तस्य गन्तुः सर्वविधलाभो भवति। नीलकण्ठस्य काकेन पराजयः गन्तुः पराभवाय तथा नीलकण्ठेन काकस्य पराजयः गन्तुर्जयाय भवति [30]।
- गमनादिकार्याणामारम्भसमये प्रथमशकुने शुभे सति कार्यान्तं यावत् शुभं जानीयात्। प्रथमशकुनानन्तरं कार्यसमाप्तिं यावत् मध्ये शकुने जाते शकुनफलं तद्दिने जानीयात् अर्थात् प्रथमशकुने शुभेऽन्तरजेऽपि शुभे कार्यारम्भदिने कार्यसिद्धिः। प्रथमशकुनेऽशुभेऽन्तरजेऽप्यशुभे तद्दिने कार्यहानिरिति। इमे कथिताः शकुनाः नियमेन विचिन्त्याः। यात्रारम्भसमये, युद्धसमये, गृहप्रवेशकाले तथा सर्वविधकार्याणां प्रारम्भकाले शुभशकुनं शुभफलदायकमशुभशकुनमशुभफलदायकं भवति। सकलकार्येषु क्षुतमशुभकरं भवति अतः क्षुतं कुत्रापि शुभदं न इति आचार्याः कथयन्ति [31]।
- एकक्रोशादनन्तरमशुभशकुनस्य प्रभावः निष्फलं भवति इति वसिष्ठकश्यपादयः प्रधानाः आचार्याः प्राहुः। प्रथमशकुनस्य अशुभे सति नृपतिः तस्य अशुभशकुनस्य अनिष्टप्रभावनिवारणार्थमेकादशप्राणायामः पूरयेत्। द्वितीयवारमशुभशकुनस्य अनिष्टप्रभावाणां निवारणार्थं नृपतिः षोडशवारं प्राणायामः पूरयेत्। यदि पुनः तृतीयवारमशुभशकुनं दृश्यते तर्हि नृपतिः अशुभशकुनजनितानिष्टस्य निवारणार्थं स्वभवनं प्रति आगच्छेत् [32]।

### आयुर्वेदग्रन्थोक्तशुभाशुभशकुनानि

आयुर्वेदशास्त्रस्य प्रसिद्धग्रन्थसुश्रुतसंहितायामुक्तं यत् रोगार्त्तस्य परीक्षणार्थं गमनकाले वैद्यस्य समक्षे यदि सद्यः क्षतः मांसः, रोगार्त्तस्य गृहे प्रवेशकाले जलेनापूरितघटस्तथा गृहात् निर्गमनकाले रिक्तघटः, आतपत्रं, विप्रः, गजः, गोवृषाः, श्वेतपदार्थाः हठात् दृष्टिपथे समागच्छति तर्हि शुभं भवति। पुत्रेण साकं स्त्री, सवत्सा गौ, यौवनावस्थासन्नालंकृता कन्या, मत्स्यः, फलं, स्वस्तिकं, मोदकः, दधि, हिरण्याक्षतैः पूर्णपात्रं, रत्नानि, पुष्पाणि, नृपः, प्रज्वलिताग्निः, अश्वः, हंसः, चाषः,शिखी, वेदाः, वेणुः, दुन्दुभिः, जीमूतः, शंखः, रथध्वनिः, सिंह–गौ–वृषभानां स्वरः, अश्वगजानामाह्लादितस्वराः, हंसस्य स्वरादयः श्रेष्ठो भवति। रोगार्त्तस्य परीक्षणार्थं गमनकाले अथवा परीक्षणकाले हृदयंगमाः स्वराः, पत्र–पुष्प–फल–दुग्धयुक्तवृक्षाश्रिताः, आकाश–गृह–ध्वज–तोरण–वेदिकाश्रिताः, शान्तदिशायां मधुरस्वरः, वामभागतः वा दक्षिणभागतः गमनशीलाः पक्षिणश्च रोगार्त्तानां कृते शुभावहाः भवन्ति। शुष्क–अशनिहत–लतयाच्छादित–सकण्टकवृक्षयुक्ताः अथवा पाषाण–भस्म–अस्थि–विट्–तुषार– पांशु–चैत्य–वल्मीक–विषमस्थानस्थिताः शकुनाः, दीप्तकर्कशस्वरयुक्ता पक्षिणः, दीप्तदिशायां पक्षिणः स्वराश्च रोगेण पीडितजनानां कृते मृत्युदायकाः भवन्ति। रोगार्त्तस्य परीक्षणार्थं गमनकाले पथि शवकाष्ठपलाशानां शुष्काणां संगमाः, दीनान्धरिपूणां संगमाश्च रोगार्त्तस्य कृते अशुभं भवति [33]। अष्टांगहृदयग्रन्थे दूतस्य शुभाशुभलक्षणं प्रदत्तम्। दीनः, भीतः, त्रस्तः, रूक्षः, अमंगलवादि, शस्त्रयुक्तः, नपुंसकः, मुण्डश्मश्रुजटाधरः, क्रूरकर्मकर्त्ता, मलिनः, स्त्री, अनेकः, व्याधितः, व्यंगं, रक्तमाल्यानुलेपयुक्तः, तैलपङ्काङ्कितः, जीर्णविवर्णार्द्रैकवासयुक्तः, खरोष्ट्रमहिषारूढः दूतः रोगस्य सूचना दातुमागच्छति तर्हि वैद्यः उपचारार्थं न गच्छेत्। एवमेव यदि वैद्यः अशस्तचिन्तावचने संलग्नः, नग्नः, वृक्षं छिन्दति, कश्चित् पदार्थं भिन्दति, अग्नौ हवनं करोति, पितृभ्यो पिण्डान् ददाति, क्रन्दनं करोति, शयनावस्थायां भवति, अपवित्रो भवति तत् समये दूतः आगत्य उपचारार्थं निवेदयति चेत् रोगार्त्तस्य मृत्युर्जायते [34]। दूतः वैद्येन साकं प्रथमसाक्षात्कारसमये नाभि–नासा–मुख–केश–रोम–नख–दंत–गुह्य–पृष्ठ–स्तन–ग्रीवा–उदर–अनामिकाङ्गु–लीनामथवा कार्पासबुससीसास्थि कपालमुशलोप–लमार्जनीशूर्पचैलान्तभस्माङ्गारदशातुषरज्जूपानतुलापा–शभग्नपदार्थान् स्पृशन्तः उपचारार्थं निवेदयति चेत् रोगार्त्तस्य निश्चितमेव मृत्युर्जायते [35]।

---

[25] यः पूर्णकूटः सकरायिकाख्यो वामः...........तेषामन्येषु देशेषु विपर्ययेण।। यो.या. शकुनाध्यायः, श्लो. 24,

[26] वामे शस्तो धन्वनः सिद्धिदाता..............पृथ्वीलाभं धन्वनागः करोति।। यो.या. शकुनाध्यायः, श्लो. 25,

[27] न्रतुरगगजातपत्रकुम्भध्वजशयनासनपुष्पचामराणि.......यातुः क्षपयति शत्रुबलं ततो नरेन्द्रः।। यो.या. शकुनाध्यायः, श्लो. 26,

[28] विषकण्टकिशुष्कवृक्षलोष्ठानवमून्र्यास्थिचितेन ............युध्यन् गां विलिखन्नखैर्वमंश्च।। यो.या. शकुनाध्यायः, श्लो. 27,

[29] उत्तानपादः स्वपते च पापो विलोक्य............मांसादिभिः पूर्णमुखश्च शस्तः।। यो.या. शकुनाध्यायः, श्लो. 28,

[30] पूर्णाननो यस्य करोति चाषः प्रदक्षिणं.........भंगो विजयो जयोऽस्य।। यो.या. शकुनाध्यायः, श्लो. 29,

[31] यो.या. शकुनाध्यायः, श्लो. 30,

[32] यो.या. शकुनाध्यायः, श्लो. 31,

[33] मांसोदकुम्भातपत्रविप्रवारणगोवृषाः................नेष्यन्ते पतितान्तस्थदीनान्धरिपवस्तथा।। सुश्रुतसंहिता, सूत्रस्थानम्, श्लो. 27–40,

[34] छीनं भीतं.....................मनुष्याणामागच्छन्ति मुमूर्षताम्।। अष्टांगहृदयः,अ.6, श्लो. 2–7,

[35] स्पृशन्तो नाभिनासा...........व्याहरन्ति मरिष्यताम्।। अष्टांगहृदयः,अ. 6, श्लो. 8–11,

यदि दूतः वैद्यस्य पार्श्वे उपचारार्थं निवेदयितुमर्धरात्रौ, मध्याह्ने, सन्ध्याकाले, पर्वदिने, षष्ठ्यां, चतुर्थ्यां, नवम्यां च तिथौ अथवा सूर्यचन्द्रग्रहणदिने, भरणी–आश्लेषा–कृत्तिका–पूर्वाषाढा–आर्द्रा–मूल–नक्षत्रेषु आगच्छति चेत् रोगार्त्तस्य निश्चितमेव मृत्युर्जायते [36]। यस्मिन् समये दूतः आगत्य रोगार्त्तस्योपचारार्थं वैद्यं निवेदयति तस्मिन् समये वैद्यस्य समक्षे विकलः, प्रेतः, छिन्नं, दग्धं, विनष्टं, छिन्नरज्जुः, दग्धवस्त्रं, नष्टघटः, तीव्रगन्धः, क्रूरस्पर्शादिनिमित्तान्युत्पद्यते तर्हि रोगार्त्तस्य मृत्युर्जायते [37]। रोगार्त्तस्य परीक्षणार्थं गमनकाले मार्गे अथवा रोगार्त्तस्य गृहे प्रवेशकाले क्रन्दनं, क्षुतम् च श्रूयते वा वैद्यस्य वस्त्रं, आतपं, उपानहं च नष्टं भवति वा चैत्यध्वजजलपूर्णपात्रं नष्टं भवति वा वैद्यस्य वस्त्राणि भस्मपांसुभिः दूषितं भवति वा सर्पमार्जारगोधासरटवानरैः पदच्छेदो भवति वा सूर्यस्थितदिशायां मुखं कृत्वा क्रूरमृगपक्षिणश्च स्वरं करोति वा कृष्णधान्यगुडतक्रलवणासवचर्मसर्षपवसातैलतृणपङ्केन्धनक्लीववमनम लदुर्गन्ध– मैथुनशत्रुशय्यासनयाननष्टमदिरापा–त्राणि च हठात् दृष्टिपथे समागच्छति तर्हि रोगार्त्तस्य कृते अशुभं भवति [38]। रोगार्त्तस्य परीक्षणार्थं गमनकाले मार्गे अथवा रोगार्त्तस्य गृहे प्रवेशकाले दध्यक्षतेक्षुप्रियंगुमधु घृतांजनभृंगारदीपककमलदूर्वार्द्रमत्स्यार्द्रमांसलाजाफ लखाद्यपदार्थरत्नाश्वगज– कन्यारथदेवताराजाश्वेतपुष्पश्वेतवस्त्रचामरशंखसाधुब्राह्मणतोरणस्वस्ति कसमानभूमिप्रज्वलिताग्निरथ– सवत्सागोस्त्रीजीवंजीवकसारंगसारसहंसशतपत्रादिपक्षीनिबद्धपशुरुचक दर्पणगोरोचनछत्रध्वजचामरज–यकारध्वनिभेरीमृदंगशंखवेदध्वनिमनोरम वायुमनोरमवस्तूनां च दर्शनं रोगार्त्तस्य कल्याणाय भवति [39]।

**शकुनवशात् वृष्टिज्ञानम्**

वर्षाकाले जलं स्वादरहितं, गोनेत्रसन्निभं आकाशः स्वक्षः स्यात्, सर्वाः दिशश्च विमलाः स्युः, काकाण्डाभं यदा नभः स्यात्, पवनः न वाति, झषादयः स्थलं यान्ति, मण्डूकाः शब्दं कुर्वन्ति तर्हि उत्तमा वृष्टिर्भवति [40]। अन्यत्रापि अयमेव विचारः प्राप्यते यथा –

विरसमुदकं गोनेत्राभं वियद्विमला दिशो।
लवणविकृतिः काकाण्डाभं यदा च भवेन्नभः।।
पवनविगमः पोप्लूयन्ते झषाः स्थलगामिनो।
रसनमसकृन्मण्डूकानां जलागमहेतवः।।

बृ.सं.श्लो.21,22,

अयमेव विषयः मयूरचित्रके, वनमालायां विचारितं वर्तते। वर्षाकाले यदि मार्जारः नखैः भूम्यां लिखन्ति, लोहाणां मलनिचयो गन्धयुक्तो जायते, बालकाः मिलित्वा मार्गे सेतुं रचयन्ति, गिरयः शुद्धांजनाभा भवन्ति, कन्दराः वाष्पयुक्ताः भवन्ति, पिपीलिकाः अण्डानि स्वीकृत्य उच्चैः प्रयान्ति, सर्पाः वृक्षोपरि गच्छन्ति तर्हि प्रचुरमात्रायां वृष्टिर्भवति [41]। वर्षाकाले वृक्षस्थः कृकलासः गावश्च सूर्यं निरीक्षन्ति, गृहस्थः पशवः कुक्कुराश्च गृहात् वहिर्गन्तुं न इच्छन्ति, लताः ऊर्ध्वमुखी स्युः, पक्षिणः पांसुभिः स्नानं कुर्वन्ति, सरीसृपाः तृणाग्राणि आश्रयन्ति, वियति तित्तिरपक्षाभाः वा भ्रमरपक्षतुल्याभा भवति तर्हि निश्चितमेव प्रबला वृष्टिर्जायते [42]। वर्षाकाले अहर्निशं वायुर्न वाति, सूर्यचन्द्रौ उष्णौ भवेतां, मण्डूकशिवाहिचातकाः रटन्ति, सूर्यमण्डलस्य द्युतिः मोरकण्ठसदृशं भवेत् तर्हि त्रिभिर्दिनैः वृष्टिर्जायते [43]।

सम्पूर्णसंस्कृतवाङ्मये शकुनानां चर्चाः प्राप्यन्ते। विशेषरूपेण वाल्मीकीरामायणस्य अरण्यकाण्डे, किष्किन्धाकाण्डे, लंकाकाण्डे च युद्धावसरे बहुषु स्थलेषु शकुनस्य चर्चाः प्राप्यन्ते। भगवतः रामस्य पक्षे विजयजन्यशकुनं तथा रावणस्य पक्षे अशुभशकुनानि जायन्ते। एवमेव भगवतः श्रीकृष्णस्य परमधामगमनसमये ये अशुभशकुनानि जातानि तेषां सर्वेषां शकुनानां वर्णनं भागवतमहापुराणे उल्लिखितं वर्त्तते। अभिमन्योः वधसमये अर्जुनस्य समक्षे यानि अशुभशकुनानि जातानि तानि सर्वाणि महाभारते विलोक्यन्ते। वस्तुतः यथा राष्ट्रस्य संचालनाय नियमः संविधानं वा भवति तथैव ब्रह्माण्डस्य संचालनाय पारब्रह्मपरमेश्वरेण नियामकरूपेण प्रकृतेः निर्माणमकरोत्। यथा संविधानस्य निरादरेण दण्डविधानं वर्त्तते तथैव प्रकृते अनादरेण मानवः,समाजः, राष्ट्रश्च विपत्तौ पतति। प्रकृते अनादरेण क्रमवद्धतायां व्यतिरेको जायते तदेव मानवस्य समक्षे अशुभशकुनं भवति अतएव मानवसमाजस्य कृते परमावश्यकं वर्त्तते प्रकृते सुरक्षा।

---

[36] तथाऽर्धरात्रे मध्याह्ने..............पूर्वार्द्रापैन्त्र्यनैर्ऋते।। अष्टांगहृदयः,अ.6, श्लो. 12,

37

[38] हाहाक्रन्दितमुत्कृष्टमाक्रुष्टं..................पावादीनामशोभनम्।। अष्टांगहृदयः,अ.6, श्लो. 17–22,

[39] दध्यक्षतेक्षुनिष्पावप्रियंगुमधुसर्पिषाम्..............विद्यादारोग्यलक्षणम्।। अष्टांगहृदयः,अ.6, श्लो. 30–39,

[40] यदा जलं च विरसं वियद्गोनेत्रसन्निभम् ............स्याद् वृष्टिरुत्तमा।। बृ.दै.र.प्र.5, श्लो. 21– 22,

[41] नखैर्लिखन्ति मार्जाराः...............तदा बहुजलप्रदाः।। बृ.दै.र.प्र.5, श्लो. 23– 25,

[42] गवः सूर्यं निरीक्षन्ति..................समादेश्या निश्चितं देवचिन्तकैः।। बृ.दै.र.प्र.5, श्लो. 26– 28,

[43] अवातवातस्तपशीत उष्णं............त्रिभिर्दिनैर्वारि पतन्ति भूतले।। बृ. दै.र.प्र.5, श्लो. 29,